दिनाङ्क :-10.11.2024

प्रात: - 06:55

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

अथ वार्ताः

महाराष्ट्रे निर्वाचनम्

महाराष्ट्रे भारतीयजनतापार्टीति दलस्य वरिष्ठो नेता प्रधानमन्त्री च नरेन्द्रमोदी उक्तवान् यत् महायुतिसर्वकारेण महाराष्ट्रस्य मराठवाडाक्षेत्रस्य विकासाय विभिन्नकार्याणि सम्पादितानि। नन्देड्-इत्यत्र सभामेकां सम्बोधयन् श्रीमोदी अवदत् यत् विगतसार्धद्विवर्षेषु मराठवाडाक्षेत्रे अशीति सहस्रकोटीतोप्यधिकरूप्यकाणां निवेशः अभवत्। सः क्षेत्रे एकादश सिञ्चनपरियोजनानां विषयेऽपि प्रकाशितवान् ।

केन्द्रसर्वकारेण अमरावत्यां टेक्सटाइलपार्क इति वस्त्रोद्यानस्य आधारशिलां स्थापयित्वा कार्पासोत्पादकाणां कृषकाणां कृते उद्योगाणां आधारभूतसंरचनाया: प्रवर्धनं कृतम्। श्रीमोदी अवदत् यत् वस्त्रोद्यानम् कार्पासकृषकाणां समृद्धेः मार्गं प्रशस्तं करिष्यति।

अकोलायां विदर्भ-क्षेत्रस्य स्वीयां प्रथम-निर्वाचनसभां सम्बोधयन् श्रीमोदी अवदत् यत् तृतीयकार्यकाले तस्य सर्वकारेण कोट्यावत् रूप्यकाणां मूल्यानां नैकाः विकासपरियोजनाः समारब्धाः। यासु महाराष्ट्रे बहव्य: आधारभूत-संरचना-परियोजनाः सम्मिलिताः सन्ति। सः विदर्भे सिञ्चन-परियोजनानां महत्त्वं प्रकाशितवान्। प्रधानमन्त्री अवदत् यत् प्राक्तन् महाविकासाघाडी-सर्वकारेण देवेन्द्र-फडणवीस-सर्वकारस्य महत्त्वाकांक्षिणः सिञ्चनपरियोजना: स्थगिता:। राज्ये महायुतिगठबन्धनस्य पुनः सत्ताप्राप्तेः अनन्तरं वैनगंगा नलगंगा अथ पेनगंगा इन्टरलाईन इति परियोजना स्वीकृता। अस्यां परियोजनायां नागपुर, वर्धा मण्डलं च समेत्य पश्चिम विदर्भस्य सर्वाणि पञ्च मन्डलानि सिञ्चनप्रणाल्याः समाविष्टा: सन्ति।

------------------------------------------------

झारखण्ड -प्रचारः

झारखण्डे विधानसभा-निर्वाचन-प्रचाराभियानं तीव्रगत्यां प्रचलति। एनडीए-I.N.D.I.A इत्येतयोः नेतारः स्वपक्षस्य प्रत्याशिनां पक्षे मतदातॄन् आकर्षयितुं राज्ये जनसभाः कुर्वन्ति। भाजपायाः वरिष्ठ: नेता प्रधानमन्त्री नरेन्द्रमोदी अद्य झारखण्डे द्वे सभे सम्बोधयिष्यति तथा च पथ प्रदर्शनं करिष्यन्ति। प्रधानमन्त्रिणः प्रथमा निर्वाचनसभा बोकारोनगरस्य चन्दनकियारी-विधानसभाक्षेत्रस्य

चण्डीपुर-पादकन्दुक-क्रीडाङ्गणे भविष्यति, द्वितीया निर्वाचनसभा गढवानगरस्य एरोड्रोम-क्रीडाङ्गणे भविष्यति। प्रधानमन्त्री रांचीनगरे पथ प्रदर्शनम् अपि करिष्यति।

------------------------------------------------

अमितशाहः-संकल्पपत्रम्

केंद्रीय गृहमंत्री अमित शाहः अद्य मुंबई नगरे महाराष्ट्र विधानसभा निर्वाचनाय भारतीय जनता पार्टीति दलस्य घोषणा पत्र इति - संकल्प पत्रस्य विमोचनं करिष्यति। श्रीशाहः उत्तरमहाराष्ट्र, विदर्भ क्षेत्रयोः जलगांवे, बुलढाणायां, अमरावत्यां च तिस्रः जनसभाः अपि सम्बोधयिष्यति।

------------------------------------------------

विश्वविद्यालयाः

एशिया पञ्चविंशत्यधिक द्विसहस्र इत्यस्य शीर्ष शत्सु शैक्षिक संस्थानेषु सप्त भारतीयसंस्थानानि सम्मिलितानि सन्ति। शीर्ष पञ्चाशत्सु द्वौ विश्वविद्यालयौ, शीर्ष शत्सु च सप्त विश्वविद्यालयाः सन्ति, दिल्ल्याः भारतीयप्रौद्योगिकीसंस्थानं चतुःचत्वारिंशत् तमे स्थाने आईआईटी बॉम्बे अष्टचत्वारिंशत् तमे स्थाने अस्ति।

------------------------------------------------

विश्व बिलियर्डस् प्रतिस्पर्धा

भारतस्य पंकज आडवाणी कतर-देशस्य दोहायां आई.बी.एस.एफ. इति विश्व बिलियर्डस् प्रतिस्पर्धां विजितवान्। निर्णायक-स्पर्धायां तेन इंग्लैण्ड देशस्य रॉबर्ट हॉल इत्यसौ पराजितः। शृङ्खलायां भारतस्य सौरभ-कोठारी कांस्य-पदकं विजितवान् ।

------------------------------------------------

संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादने भविष्यति। कृपया श्रृण्वन्तु।

।।इति वार्ता:।।